## शुकरहस्योपनिषदि महावाक्यजपविधिः

**‘अहं ब्रह्मास्मि’ इत्यस्य श्रीमहावाक्यमहामंत्रस्य हंस ऋषिः, अव्यक्तगायत्री छन्दः, परमहंसो देवता, हं बीजम्, सः शक्तिः, सोऽहं कीलकम्, मम परमहंसप्रीत्यर्थे महावाक्यजपे विनियोगः।**

अथ ऋष्यादिन्यासः:- **‘अहं ब्रह्मास्मि’ इत्यस्य श्रीमहावाक्यमहामंत्रस्य हंसर्षये नमः** – शिरसि, **अव्यक्तगायत्रीछन्दसे नमः** – मुखे, **परमहंसदेवतायै नमः** – हृदि, **हं बीजाय नमः** – गुह्ये, **सः शक्तये नमः** – पादयोः, **सोऽहं कीलकाय नमः** – नाभौ, **मम परमहंसप्रीत्यर्थे महावाक्यजपे विनियोगाय नमः** – सर्वांगे।

अथ करादिषडंगन्यासः :-

| अथ मन्त्राः | अथ करन्यासः | अथ हृदयादिन्यासः |
|---|---|---|
| **ॐ सत्यं ज्ञानमनन्तं ब्रह्मेति** | **अंगुष्ठाभ्यां नमः** | **हृदयाय नमः** |
| **ॐ नित्यानन्दो ब्रह्मेति** | **तर्जनीभ्यां स्वाहा** | **शिरसे स्वाहा** |
| **ॐ नित्यानन्दमय ब्रह्मेति** | **मध्यमाभ्यां वषट्** | **शिखायै वषट्** |
| **ॐ यो वै भूमेति** | **अनामिकाभ्यां हुम्** | **कवचाय हुम्** |
| **ॐ यो वै भूमाधिपतिरिति** | **कनिष्ठिकाभ्यां वौषट्** | **नेत्रत्रयाय वौषट्** |
| **ॐ एकमेवाद्विितीयं ब्रह्मेति** | **करतलकरपृष्ठाभ्यां फट्** | **अस्त्राय फट्** |

**। ॐभूर्भुवःसुवरोमिति दिग्बन्धः।**

अथ ध्यानम्: **नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं, विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।**
**एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं, भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि।।**

ततः यथाशक्ति महावाक्यस्य जपं कुर्यात्। ततः **तेजोबिन्दूपनिषत्स्थमिदं स्तोत्रं पठेत्** :-

**अहं ब्रह्मास्मि मंत्रोऽयं दृश्यपापं विनाशयेत्। अहं ब्रह्मास्मि मन्त्रोऽयमन्यमंत्रं विनाशयेत्।।**
**अहं ब्रह्मास्मि मन्त्रोऽयं देहदोषं विनाशयेत्। अहं ब्रह्मास्मि मन्त्रोऽयं जन्मपापं विनाशयेत्।।**
**अहं ब्रह्मास्मि मन्त्रोऽयं मृत्युपाशं विनाशयेत्। अहं ब्रह्मास्मि मन्त्रोऽयं द्वैतदुःखं विनाशयेत्।।**
**अहं ब्रह्मास्मि मन्त्रोऽयं भेदबुद्धिं विनाशयेत्। अहं ब्रह्मास्मि मन्त्रोऽयं चिंतादुःखं विनाशयेत्।।**
**अहं ब्रह्मास्मि मन्त्रोऽयं बुद्धिव्याधिं विनाशयेत्। अहं ब्रह्मास्मि मन्त्रोऽयं चित्तबंधं विनाशयेत्।।**
**अहं ब्रह्मास्मि मन्त्रोऽयं कामादीन्नशयेत्क्षणात्। अहं ब्रह्मास्मि मन्त्रोऽयं सर्वशोकं विनाशयेत्।।**
**अहं ब्रह्मास्मि मन्त्रोऽयं सर्वव्याधीन्विनाशयेत्। अहं ब्रह्मास्मि मन्त्रोऽयं क्रोधशक्तिं विनाशयेत्।।**
**अहं ब्रह्मास्मि मन्त्रोऽयं चित्तवृत्तिं विनाशयेत्। अहं ब्रह्मास्मि मन्त्रोऽयं संकल्पादीन्विनाशयेत्।।**
**अहं ब्रह्मास्मि मन्त्रोऽयं कोटिदोषं विनाशयेत्। अहं ब्रह्मास्मि मन्त्रोऽयं सर्वतंत्रं विनाशयेत्।।**
**अहं ब्रह्मास्मि मन्त्रोऽयमात्माज्ञानं विनाशयेत्। अहं ब्रह्मास्मि मन्त्रोऽयं सर्वांस्तान्मोक्षयिष्यति ।।**
**अहं ब्रह्मास्मि मन्त्रोऽयमप्रतर्क्यसुखप्रदः । अहं ब्रह्मास्मि मन्त्रोऽयमात्मलोकजयप्रदः।।**
**अहं ब्रह्मास्मि मन्त्रोऽयं ज्ञानानन्दं प्रयच्छति । अहं ब्रह्मास्मि मन्त्रोऽयमजडत्वं प्रयच्छति ।।**
**अहं ब्रह्मास्मि मन्त्रोऽयमनात्माख्यासुरान्हरेत् । अहं ब्रह्मास्मि मन्त्रोऽयमनात्माख्यगिरीन्हरेत् ।।**
**अहं ब्रह्मास्मि मन्त्रोऽयमनात्मासुरमर्दनः । सप्तकोटिमहामंत्रं जन्मकोटिशतप्रदं ।।**
**सर्वमंत्रान्समुत्सृज्य एतं मंत्रं समभ्यसेत् । सद्यो मोक्षमवाप्नोति नात्र संदेहमण्वपि ।।**

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

अन्ते चेत्थं समर्पयेत् :- **ज्ञानवैराग्यसिद्धिपूर्वकं मुक्त्यर्थं ब्रह्मार्पणमस्तु। हरिः ॐ तत्सत्।।**

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM